JSUNIL TUTORIAL
ACBSE Coaching for Mathematics and Science

5RLUZD7

# सङ्कलनात्मकं मूल्याङ्कनम् - I (2014-15)

## संस्कृतम् - सम्प्रेषणात्मकम्

## कक्षा - नवमी

समय : होरात्रयम् पूर्णाङ्काः 90

**निर्देशाः**

(i) प्रश्नपत्रे चत्वारः खण्डाः सन्ति।

| | | |
|---|---|---|
| खण्डः (क) अपठित-अवबोधनम् | - | 10 अङ्काः |
| खण्डः (ख) रचनात्मक-कार्यम् | - | 15 अङ्काः |
| खण्डः (ग) अनुप्रयुक्त-व्याकरणम् | - | 30 अङ्काः |
| खण्डः (घ) पठित-अवबोधनम् | - | 35 अङ्काः |

(ii) सर्वे प्रश्नाः **अनिवार्याः**।

(iii) प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि।

(iv) प्रश्नसंख्या अवश्यमेव लेखनीया।

(v) उत्तराणि संस्कृतेनैव लेखनीयानि।

## खण्ड : 'क'

## अपठित-अवबोधनम् - ( 10 अङ्काः )

1 **अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत -** 0

एकदा एकः वैदेशिकः प्रथमराष्ट्रपतेः श्री राजेन्द्रप्रसादस्य गृहं प्राप्तवान्। राष्ट्रपतेः परिचारकः तम् आतिथ्यगृहे प्रतीक्षितुम् अकथयत् तम् असूचयत् च यद् राष्ट्रपतिमहोदयाः सम्प्रति पूजां कुर्वन्ति। सः अतिथिः ज्ञातुम् ऐच्छत् यद् राष्ट्रपतिः कथं करोति पूजाम्? सङ्कोचं कुर्वन् अपि स अन्तः पूजागृहं प्रविष्टः। राष्ट्रपतेः समक्षं विद्यमानं मृत्पिण्डं सोऽवन्दत श्रद्धया च तत्र उपाविशत्। पूजां परिसमाप्य राष्ट्रपतिमहोदयः ससम्मानं तम् अन्तः अनयत्। श्री राजेन्द्रमहोदयः तस्य कौतूहलं विज्ञाय तस्मै समबोधयत्- एतत् मृत्पिण्डं भारतस्य भूम्याः प्रतीकम् अस्ति। वयं मृत्तिकायाः कणेषु ईश्वरस्य दर्शनमपि कुर्मः। अस्माकं विचारे तु मानवेषु, पशुपक्षिषु, पाषाणेषु, वृक्षादिषु किं वा अचेतनेषु अपि ईश्वरस्य सत्ता अस्ति।

**प्रश्नाः :**

**(I) एकपदेन उत्तरत -**

(i) श्री राजेन्द्रप्रसादस्य गृहं कः प्राप्तवान्?

(ii) मानवेषु, पशुपक्षिषु, पाषाणेषु, वृक्षादिषु, अपि कस्य सत्ता अस्ति?

**(II) पूर्णवाक्येन उत्तरत -**

(i) अतिथि: किं ज्ञातुम् ऐच्छत्?

(ii) श्री राजेन्द्रमहोदय: आगन्तुकं किं समबोधयत्?

(III) **अस्य अनुच्छेदस्य कृते उचितम् शीर्षकं लिखत।**

(IV) **निर्देशानुसारम् उत्तरत -**

(i) ''एकदा एक: वैदेशिक: प्रथमराष्ट्रपते: श्रीराजेन्द्रप्रसादस्य गृहं प्राप्तवान्'' अत्र 'प्राप्तवान्' इति क्रियापदस्य किम् कर्तृपदम् अस्ति?

(अ) वैदेशिक: (ब) प्रथमराष्ट्रपते:

(स) श्रीराजेन्द्रप्रसादस्य (द) एक:

(ii) 'बहि:' पदस्य किं विपर्ययम् अनुच्छेदे प्रयुक्तम्?

(अ) समक्षम् (ब) सम्पदम्

(स) अन्त: (द) विद्यमानम्

(iii) 'तस्मै' इति सर्वनामपदं कस्मै प्रयुक्तम्?

(अ) परिचारकस्य (ब) आगन्तुकाय

(स) राजेन्द्रप्रसादाय (द) पाषाणाय

(iv) 'एतत्' पदस्य किम् विशेष्यपदम् प्रयुक्तम्?

(अ) सम्पदम् (ब) महतीम्

(स) भारतीया: (द) मृत्पिण्डम्

## खण्ड: 'ख'

## रचनात्मकं-कार्यम् - (15 अङ्का:)

2 **भवान् केतन:। भवतां विद्यालय अन्तर्विद्यालयीय संस्कृतप्रतियोगितासमारोह: समायोजित:। तत्र संस्कृतभाषणप्रतियोगितायाम् भवता प्रथम: पुरस्कार: प्राप्त:। तत् सूचयता भवता स्वमित्रं गौरीशं प्रति लिखिते पत्रे रिक्तस्थानानि पूरयित्वा पत्रं पुन: लिखत।** 5

छात्रावास:

16, लाजपतनगरम्,

(i)

दिनांक: .........

प्रिय मित्र (ii) !

सस्नेहम् (iii),

अत्र वयं सर्वे (iv)। अस्माकं विद्यालये गतसप्ताहे अन्तर्विद्यालयीय: संस्कृतप्रतियोगितासमारोह:समायोजित:। तत्र एका भाषणप्रतियोगिता (v)। अहं तस्यां (vi) प्रथमं पुरस्कारं लब्धवान् ।संस्कृतभाषणेन (vii) आत्मविश्वास:वर्धित: अभवत्। अधुना अहं संस्कृतभाषायाम् एव वदामि।भवान् अपि (viii) कुर्यात्। पितृभ्याम् नमो नम:।

(ix) अभिन्नमित्रम्

(x) ।

मञ्जूषा
गौरीशः अभिवादनम्, दिल्लीतः, अभवत्, भवतः, केतनः, मयि, प्रतियोगितायाम्, प्रयत्नं, कुशलिनः

3 मञ्जूषायां प्रदत्तशब्दानां सहायतया चित्रं दृष्ट्वा पञ्चवाक्यानि संस्कृतेन लिखत। 10



मञ्जूषा
रिक्शायानम्, विद्युद्दीपकाः, चलन्ति, आपणानि, कारयानानि, वाहकयानानि, द्विचक्रिका, जनाः, यातायातः, अस्तव्यस्तः, मार्गः, अस्ति, न पालयन्ति, अवरुद्धः, नियमान्, सन्ति

अथवा

'प्रातःभ्रमणम्' इति विषयम् अधिकृत्य मञ्जूषापदसाहाय्येन पञ्च संस्कृतवाक्यानि लिखत – .0

मञ्जूषा
'प्रातः कालः, मन्दः पवनः, शीतलः, व्यायामः, मनोहराणि, दृश्याणि, सर्वत्र, सर्वे, भ्रमणम्, वृद्धाः, पुष्पाणि, बालकाः, उद्यानस्य विकसन्ति, जनाः, स्वस्थाः, अपि, कुर्वन्ति

## खण्डः 'ग'
## अनुप्रयुक्त व्याकरणम् – ( 30 अङ्काः )

4 अधोलिखितप्रश्नानाम् उत्तराणि उत्तरपुस्तिकायां लिखत –

(i) ढ – वर्णस्य उच्चारणस्थानम् लिखत।

(ii) परमेश्वरः – इति पदे ओष्ठ्यं वर्णं लिखत।

रिक्तस्थानं पूरयत –

(iii) भवनम् – भ् + अ + व् + अ + न् + अ + ________

(iv) क् + ओ + क् + इ + ल + अः = ________

5 प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा संन्धिं सन्धिच्छेदं वा कुरुत – 5

(i) सर्वाभिशंकी मा भवेत्।

(अ) सर्वा + भिशंकी (ब) सर्वा + आभिशंकी

(स) सर्व + अभिशंकी (द) सर्वे + अभिशंकी

(i) 'एलोवीरा' तु महौषधिः वर्तते।

(अ) महो + ओषधिः (ब) महौ + षधिः

(स) महा + ओषधिः (द) महौ + ओषधिः

(iii) जगद्बन्धुः प्रभुः सर्वेषां हितं करोति।

(अ) जगत् + बन्धुः (ब) जगट् + बन्धुः

(स) जगद् + बन्धुः (द) जगति + बन्धुः

(iv) नियमानाम् उत् + लङ्घनम् मा कुरु।

(अ) उद्लङ्घनम् (ब) उल्लङ्घनम्

(स) उड्लङ्घनम् (द) उन्लङ्घनम्

(v) समाजे विद्याहीनाः + न शोभन्ते।

(अ) विद्याहीनास्न (ब) विद्याहीना न

(स) विद्याहीनो न (द) विद्याहीनार्न

6 उचितशब्दरूपाणि चित्वा रिक्तस्थानानि पूरयत –

(i) ___ पत्राणि पतन्ति।

(अ) वृक्षस्य (ब) वृक्षाय

(स) वृक्षम् (द) वृक्षात्

(ii) ___ पिता अध्यापकः अस्ति।

(अ) मम (ब) माम्

(स) अहम् (द) मयि

(iii) ___ कन्दुकेन क्रीडन्ति।

(अ) बालकः (ब) बालकाः

(स) बालेन (द) बालकम्

(iv) तडागे ___ शोभन्ते।

(अ) कमलानि (ब) कमलम्

(स) कमलाः (द) कमलाय

(v) अहम् ______ आम्रवृक्षम् आरोपयामि। (वाटिका)

(अ) वाटिका (ब) वाटिकायाम्

(स) वाटिके (द) वाटिकाम्

7 उचितधातुरूपाणि चित्वा रिक्तस्थानानि पूरयत। 5

(i) एतौ स्वयंसेवकौ अनाथालयं गत्वा बालान् ________ ।

(अ) सेविष्यते (ब) सेविष्यन्ते

(स) सेविष्येते (द) सेवते

(ii) त्वम् परिश्रमम् कृत्वा पुरस्कारम् ________ ।

(अ) अलभत (ब) अलभथाः (स) अलभे (द) लभते

(iii) ह्यः अहम् पुस्तकालयात् पुस्तकानि गृहम् ________ ।

(अ) अनयत् (ब) अनयः (स) नयति (द) अनयम्

(iv) तौ पाचकौ अस्मिन् भोजनालये भोजनम् ________ ।

(अ) पचन्ति (ब) पचथः (स) पचतः (द) पचावः

(v) अहम् सभायाम् उच्चैः न ________ ।

(अ) हसति (ब) हसामि (स) हसति (द) हसन्ति

8 कोष्ठके प्रदत्तशब्दानाम् उचितरुपैः रिक्तस्थानानि पूरयत - 5

(i) ________ पुरतः जनाः द्यूतक्रीडां क्रीडन्ति। (व्यायामशालाम)

(ii) ________ पृष्ठतः कः तिष्ठति? (अजय)

(iii) ________ मम विद्यालयः श्रेष्ठतमः अस्ति। (विद्यालय)

(iv) ________ उभयतः पुष्पगुच्छाः सन्ति। (शय्या)

(v) ________ सह कः कः आगमिष्यति? (युष्मद् एकवचने)

9 रेखाङ्कितपदेषु प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उत्तरं लिखत। 5

(i) सा चिटिकां क्री+तुमुन् पङ्क्तौ तिष्ठति।

(ii) बालः जलम् आनीय वृक्षान् सिञ्चति।

(iii) शिक्षिका पाठं शिक्षय्+क्त्वा प्रश्नान् पृच्छति।

(iv) मित्राणि जन्तुशालां परि+भ्रम्+ल्यप् मृगान् अपश्यन्।

(v) पाचकः भोजनं पक्त्वा परिवेषयति।

(vi) छात्रः प्रथमस्थानं लब्धुं प्रयत्नं करोति।

## खण्ड : 'घ'
## पठित-अवबोधनम् - 35 अङ्काः

10 **अधोलिखितं गद्यांशं पठित्वा प्रदत्त-प्रश्नानाम् उत्तराणि संस्कृतेन लिखत** 5

इह खलु पञ्चेन्द्रियाणि, पञ्चेन्द्रियद्रव्याणि, पञ्चेन्द्रियार्थाः च भवन्ति। तत्र चक्षुः श्रोत्रं घ्राणं जिह्वा त्वक् चेति पञ्चेन्द्रियाणि। पञ्चेन्द्रियद्रव्याणि खं वायुः ज्योतिः आपो भूः इति। पञ्चेन्द्रियार्थाः शब्दस्पर्शरूपरसगन्धाः। मनःपुरःसराणि च इन्द्रियाणि अर्थसंग्रहसमर्थानि भवन्ति। न इन्द्रियवशगः स्यात्। न चंचलं मनः अनुभ्रामयेत्।

(I) **एकपदेन उत्तरत।**
- (i) कः न स्यात्?
- (ii) कीदृशं मनः न अनुभ्रामयेत्?

(II) **पूर्णवाक्येन उत्तरत।**

पञ्चेन्द्रियाणां नामानि लिखत।

(III) **यथानिर्देशम् उत्तरत —**
- (i) 'नेत्रम्' इत्यस्य समानार्थकं पदं किम्?
  - (अ) चक्षुः (ब) खम्
  - (स) घ्राणम् (द) आपो
- (ii) 'मनःपुरःसराणि ...... भवन्ति' इत्यत्र कर्तृपदं किम्?
  - (अ) मनःपुरःसराणि (ब) द्रव्याणि
  - (स) अर्थसंग्रहसमर्थानि (द) इन्द्रियाणि

11 **अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत-**

माता शत्रुः पिता वैरी येन बालो न पाठितः।
न शोभते सभामध्ये हंसमध्ये बको यथा।।

I. **एकपदेन उत्तरत।**
- (i) हंसमध्ये कः न शोभते?
- (ii) येन बालः न पाठितः सा माता कीदृशी?

II. **पूर्णवाक्येन उत्तरत।**

सः पिता कीदृशः भवति येन स्वबालः न पाठितः?

III. **उचितम् उत्तरं चित्वा लिखत—**
- (i) 'शोभते' इति क्रियापदस्य कर्तृपदं किम्?
  - (अ) शत्रु (ब) पिता (स) येन (द) बालः

(ii) 'मित्रम्' इति पदस्य विलोमपदं किम्?

(अ) बालः (ब) शत्रुः

(स) पाठितः (द) बकः

12 **अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –**

रामः – वत्स लक्ष्मण !किमेवं भरतः प्राप्तः ?

लक्ष्मणः – आर्य! अथ किम्?

सीता – आर्यपुत्र! किं भरतः आगतः ?

रामः – मैथिलि! अथ किम्?

अद्य खल्ववगच्छामि पित्रा मे दुष्करं कृतम्।
कीदृशस्तनयस्नेहो भ्रातृस्नेहोऽयमीदृशः ।।

I. **एकपदेन उत्तरत।**

(i) रामः कं वत्स इति सम्बोधयति?

(ii) सीतायाः अन्यत् किम् नाम अस्ति?

II. **पूर्णवाक्येन उत्तरत।**

रामः मैथिलीं प्रति किम् अवदत्?

III. **उचितम् उत्तरं चित्वा लिखत -**

(i) अत्र 'सुकरम्' इति पदस्य विलोमः कः अस्ति?

(अ) खलु (ब) कृतम् (स) अद्य (द) दुष्करम्

(ii) अत्र 'आर्यपुत्र' इति सम्बोधनं कस्मै प्रयुक्तम्?

(अ) लक्ष्मणाय (ब) रामाय

(स) भरताय (द) सीतायै

13 **अधोलिखितपंक्तीनाम् उचितं भावार्थं चित्वा उत्तरपुस्तिकायां लिखत –**

(i) न शोभते सभामध्ये हंसामध्ये बको यथा।

(क) विदुषाम् सभायाम् विद्याविहीनः अज्ञः न शोभते।

(ख) विदुषाम् सभायाम् विद्वान् न शोभते।

(ग) हंसानाम् सभायाम् बकः न शोभते।

(ii) मार्गारब्धाः सर्वयत्नाः फलन्ति।

(क) मार्गे दैवयोगेन सर्वे यत्नाः फलन्ति।

(ख) ताः एव चेष्टाः फलदायिकाः भवन्ति याः उचितमार्गे सोद्देश्यं प्रारभ्यन्ते।

(ग) आरम्भे सर्वे यत्नाः मार्गे फलदायकाः भवन्ति।

(iii) न कार्यकालमतिपातयेत्।

(क) कार्यं सदैव अति एव कुर्यात्।

(ख) कार्यंकालं समये एव कुर्यात्।

(ग) कार्यं सदैव समये एव कुर्यात्।

(iv) अगच्छन् वैनतेयोऽपि पदमेकं न गच्छति।

(क) सततम् अगच्छन् अपि गरुड: शतं क्रोशान् गच्छति।

(ख) विनताया: पुत्र: गरुड: शनै: गच्छन् अपि स्वगन्तव्यं न प्राप्नोति।

(ग) तीव्रगामी अपि गरुड: यदि न चलति तर्हि एकं पदमपि न सरति।

14 **निम्नलिखित श्लोकयो: अन्वयं मञ्जूषात: समुचितं पदं चित्वा पूरयत।** 4

(क) कीटोऽपि सुमन:सङ्गादारोहति सतां शिर:।
अश्मापि याति देवत्वं महद्भि: सुप्रतिष्ठित:।।

**अन्वय:** - __(i)__ अपि सुमन:सङ्गात् सतां __(ii)__ आरोहति __(iii)__ सुप्रतिष्ठित: __(iv)__ अपि देवत्वं याति।

(ख) "सुचिरेणापि कालेन यश: किञ्चिन्मयार्जितम्।
अचिरेणैव कालेन भरतेनाद्य सञ्चितम्।।

**अन्वय:** - __(i)__ कालेन अपि मया किञ्चित् यश: __(ii)__ । भरतेन (तु) अद्य __(iii)__ एव कालेन (यश:) __(iv)__

**मञ्जूषा**

शिर: महद्भि:, कीट:, सुचिरेण, अश्मा, सञ्चितम्, अचिरेण, अर्जितम्।

15 **रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत।**

(i) अग्नि: काष्ठात् जायते।

(ii) राजा पण्डितसभां कारितवान्।

(iii) भरत: भ्रातृवत्सल: अस्ति।

(iv) स्यूते फलानि सन्ति।

16 **घटनाक्रमानुसारं अधोलिखितवाक्यानि क्रमेण पुन: लिखत।**

(i) नकुल: बालकस्य रक्षायै नियुक्त: कृत:।

(ii) नकुलं हत्वा विप्र: आत्मानं मुषितं मन्यते।

(iii) तस्य भार्या तं बालरक्षायाम् अवस्थाप्य गता।

(iv) राज्ञा विप्र: श्राद्धार्थं निमन्त्रित:।

(v) नकुल: समीपम् आगच्छन्तं सर्पम् अमारयत्।

(vi) विप्र: श्राद्धार्थं राजभवनम् अगच्छत्।

(vii) माधवः उज्जयिन्याम् वसति स्म।

(viii) नकुलेन बालकः खादितः इति विचार्य माधवः नकुलम् अमारयत्।

17 **अधोलिखितवाक्ययोः रेखांकितपदयोः कृते उचितम् अर्थं चित्वा लिखत।** 4

**(क)** (i) श्वेतकेतुः पितुः <u>सकाशम्</u> आगच्छत्।

| | | | |
|---|---|---|---|
| (अ) | सत्यम् | (ब) | आचार्यम् |
| (स) | समीपम् | (द) | पठनम् |

(ii) नवाम्बुभिः भूरिविलम्बिनो <u>घनाः</u>।

| | | | |
|---|---|---|---|
| (अ) | पयोधयः | (ब) | मेघाः |
| (स) | सघनाः | (द) | सागराः |

**(ख) शब्दानाम् अर्थैः सह मेलनं कुरुत।**

| | | | |
|---|---|---|---|
| (i) | सुभाषितम् | - | अन्धकारः |
| (ii) | तमः | - | परिश्रमः |
| (iii) | पुरुषार्थः | - | असत्यम् |
| (iv) | अनृतम् | - | मधुरवचनम् |